# श्रीगुरुस्तुतिः

Shri Gurustutih

sanskritdocuments.org

November 10, 2018

# Shri Gurustutih

# શ્રીગુરુસ્તુતિઃ

## Sanskrit Document Information

Text title : gurustutiH

File name : gurustutiH.itx

Category : deities_misc, sachchidAnanda-shivAbhinava-nRisiMhabhAratI, gurudeva

Location : doc_deities_misc

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : November 9, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

November 10, 2018

*sanskritdocuments.org*

Shri Gurustutih

# શ્રીગુરુસ્તુતિઃ

ગુરુવરકરુણાં હિત્વા કો વા સ્વેષ્ટં લભેત લોકેઽસ્મિન્ ।
તસ્માદ્ગુરુવરચરણં ભજ ચેતઃ સર્વસૌખ્યમૂલં ત્વમ્ ॥ ૧॥

ગુરુવર કરુણાસાગર તરુણારુણવસ્ત્રસંવૃતાઙ્ગ વિભો ।
કુરુ કરુણાં મયિ દીને સુરવરતરુગર્વહરણનિપુણકર ॥ ૨॥

હિત્વા તવ ચરણં મમ શરણં જાનાસિ નાન્યદસ્તીતિ ।
ગુરુવર નૃસિંહ તસ્માત્પાલય બુદ્ધિં સુનિશ્ચલાં દત્ત્વા ॥ ૩॥

બહુશઃ કૃતપાપમપિ ક્રિયમાણાઘં ગુરો પાહિ ।
દોષાકરમપિ શમ્ભુર્ધત્તે શીર્ષે ન કિં બ્રૂહિ ॥ ૪॥

નાવોચઃ કિં પૂર્વં ત્વમપિ ભવેઃ શ્રીસદાશિવેન્દ્રાભઃ ।
ઇતિ કસ્માન્મમ મમતા દેહે જાગર્તિ ગુરુવર બ્રૂહિ ॥ ૫॥

સ્વપ્ને મમોત્તમાઙ્ગે સ્વયમાહૂયાતિકરુણયા ચરણૌ ।
દધતસ્તવ નિકટે મમ ગુરુવર નરસિંહ યાચના કાસ્તિ ॥ ૬॥

સ્વપ્નેઽપિ રામનિકટે મચ્છ્રેયઃ પ્રાર્થનાકર્તુઃ ।
ગુરુવર તવ નિકટે મમ કર્તવ્યા પ્રાર્થના કાસ્તિ ॥ ૭॥

નરસિંહાપરરૂપે મત્પાલનબદ્ધકઙ્કણે ભવતિ ।
જાગ્રતિ સતિ મમ નિકટે ગુરુવર ભીતિર્ભવેત્કસ્માત્ ॥ ૮॥

કુત્ર ગતોઽત્રૈવાહં તિષ્ઠામીત્યભયવિતરણવ્યગ્રે ।
ભવતિ ભવતાપહારિણિ ગુરુવર ભીતિઃ કુતસ્ત્યા મે ॥ ૯॥

ત્વચ્ચરણભક્તિપૂરિતમાનસમેનં ગુરો વિધાયાશુ ।
સકલભયશૂન્યહૃદયં કુરુ કરુણાવારિધે નૃસિંહગુરો ॥ ૧૦॥

પ્રણતાદ્વૈતવિબોધનમચિરાત્કર્તું ગિરેવ નામ્ના ચ ।
સ્વીકૃતનરસિંહાભિધમનિશં કલયામિ ગુરુવરં કઞ્ચિત્ ॥ ૧૧॥

પ્રત્યક્ષં બહુકરુણં પ્રવિહાય ત્વાં ગુરોઽન્યભજનં મે ।
કરસંસ્થાન્નવિસર્જનપૂર્વકભિક્ષાટનં ન કિમુ ॥ ૧૨॥

નૈસર્ગિકકરુણાજનિભૂમૌ મન્મૂર્તિમદ્ભાગ્યે ।
ત્વય્યપરાધા મત્કા ગુરુવર કુર્વન્તિ કલ્મષં કિં ભો ॥ ૧૩॥

ચિત્તં મામકમનિશં સચ્ચિત્સુખરૂપગં દૃઢં પ્રભવેત્ ।
યદ્વત્તથાશુ કૃત્વા પાલય સતતં નૃસિંહગુરો ॥ ૧૪॥

વિકૃતિર્નૈવ મમ સ્યાત્કાયેઽસ્મિંશ્છિદ્યમાનેઽપિ ।
ચિત્તે યથા તથા ત્વં કુરુ કરુણાવારિધે નૃસિંહગુરો ॥ ૧૫॥

સચ્ચિત્સુખરૂપોઽહં નૈવેદં દૃશ્યમિત્યચલામ્ ।
બુદ્ધિં પ્રયચ્છ મહ્યં કરુણામૃતવારિધે નૃસિંહગુરો ॥ ૧૬॥

અપુનઃસ્મરણં લોકં દેહં શાસ્ત્રં ચ વિસ્મૃત્ય ।
આનન્દં નિરવધિકં પ્રાપ્નોમિ કદા નૃસિંહગુરો ॥ ૧૭॥

સ્થૂલે સૂક્ષ્મે હેતૌ દેહેઽહન્તાં સમુત્સૃજ્ય ।
ચિષેઽહનનન્તા મે સમુદેતિ કદા નૃસિંહગુરો ॥ ૧૮॥

ઇતિ શૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-
ભારતીસ્વામિભિઃ વિરચિતા શ્રીગુરુસ્તુતિઃ સમ્પૂર્ણા ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

---

*Shri Gurustutih*

pdf was typeset on November 10, 2018

Please send corrections to *sanskrit@cheerful.com*